Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 2 | ISSN : 2582-0095

# स्मृतिप्रामाण्यविचारः

**डा.सुधांशुशेखरमहापात्रः**
सहाचार्यः, धर्मशास्त्रविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

**Article Info**
Volume 5, Issue 2
Page Number : 61-65

**Publication Issue :**
March-April-2022

**Article History**
Accepted : 02 March 2022
Published : 20 March 2022

**सारांशः –** *स्मर्यत इति व्युत्पत्त्या स्मृधातोः क्तिन् प्रत्यये कृते स्मृतिशब्दो निष्पद्यते। शब्दोऽयं सामान्येन स्मरणरूपमर्थं बोधयन्नपि वेदार्थस्मरणरूपं शास्त्रं गमयति। प्राचीनकाले यदा गुर्वध्ययनपूर्वकमध्ययनमासीत्तदा गुरुमुखात् सर्वाणि शास्त्राणि श्रुत्वा शिष्या मनसि धारयन्ति स्म। तस्मात्सर्वेषां शास्त्राणां स्मरणसाध्यत्वात् स्मृतिरिति संज्ञा प्रचलिताऽऽसीत्। ततश्च सांख्यव्याकरणन्यायवेदान्तादिशास्त्राणामपि स्मृतिशब्देन व्यवहारः प्राचीनैः कृतो दृश्यते। एतादृशेषु स्थलेषु स्मृतिशब्दस्य यौगिकत्वेऽपि श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति मनुवचनात् स्मृतिशब्दो धर्मशास्त्रे रूढः। यद्भवतु तत्र अधुना मया स्मृतिप्रामाण्यविचारप्रसङ्गे आलोच्यते।*

**मुख्यशब्दाः –** *स्मृतिः, श्रुतिः, धर्मशास्त्रं, शास्त्राणां, प्रामाण्यम्।*

स्मर्यत इति व्युत्पत्त्या स्मृधातोः क्तिन् प्रत्यये कृते स्मृतिशब्दो निष्पद्यते। शब्दोऽयं सामान्येन स्मरणरूपमर्थं बोधयन्नपि वेदार्थस्मरणरूपं शास्त्रं गमयति। प्राचीनकाले यदा गुर्वध्ययनपूर्वकमध्ययनमासीत्तदा गुरुमुखात् सर्वाणि शास्त्राणि श्रुत्वा शिष्या मनसि धारयन्ति स्म। तस्मात्सर्वेषां शास्त्राणां स्मरणसाध्यत्वात् स्मृतिरिति संज्ञा प्रचलिताऽऽसीत्। ततश्च सांख्यव्याकरणन्यायवेदान्तादिशास्त्राणामपि स्मृतिशब्देन व्यवहारः प्राचीनैः कृतो दृश्यते। एतादृशेषु स्थलेषु स्मृतिशब्दस्य यौगिकत्वेऽपि श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति [i]मनुवचनात् स्मृतिशब्दो धर्मशास्त्रे रूढः। रूढिर्योगापहारिणी, योगाद्रूढिर्बलीयसीति न्यायाच्च धर्मशास्त्रमित्यर्थः स्पष्टीभवति। तदेव स्मृतिपर्यायवाचि धर्मशास्त्रं–

**पुराण-न्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।। इति।।**

[ii] याज्ञवल्क्यवचनाच्चतुर्दशसु विद्यास्वन्यतमत्वेन गण्यते। पुनश्च षट्सु वेदाङ्गेषु कल्पत्वेन स्वीकृतस्याङ्गस्याऽवान्तरभेदरूपेण यद् धर्मसूत्रमिति प्रसिद्धं तस्य स्मृतेरपेक्षया विषयगतभेदराहित्येऽपि रचनाशैलीगतभेददर्शनात् संज्ञाभेदः परिकल्पितः। परन्तु स्मृतिधर्मसूत्रयोरुभयोर्धर्मशास्त्रत्वमविरुद्धम्। अत एव ऐतिहासिका धर्मशास्त्रसाहित्यं मुख्यतः त्रेधा विभजन्ति। यथा– स्मृतिसाहित्यं, सूत्रसाहित्यं, निबन्धसाहित्यञ्चेति।

एतेषु पुनः स्मृतिसाहित्यसूत्रसाहित्ययोर्मध्ये पौर्वापर्यनिर्णये विवदन्ते विद्वांसः। रचनाशैलीदृष्ट्या प्रथमधर्मसूत्रकारस्य गौतमस्य शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य चेति [iii]मनुना उतथ्यतनयत्वेन परम्परया गौतमस्य नामोट्टङ्कनान्मनोरपेक्षया तस्य प्राचीनतरत्वमिति केषाञ्चिदाधुनिकानां पक्षः। परन्तु [iv]गौतमधर्मसूत्रे त्रीणि प्रथमान्यनिर्देश्यानि मनुरिति प्रथमस्मृतिकारस्य मनोः साक्षान्नामोट्टङ्कनात् परम्पराप्रमाणापेक्षया साक्षात्प्रमाणस्य च गुरुत्वात् गौतमापेक्षया मनुः प्राचीनतर इति सिद्धान्तितम्। अतो धर्मसूत्राणामपेक्षया स्मृतीनां प्राचीनतरत्वात् प्राथम्यं प्राधान्यञ्च प्रतीयते। प्राधान्येन व्यपदेशा भवन्तीति न्यायाच्च धर्मशास्त्राणां

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

स्मृतिरिति संज्ञा सार्वजनीना शास्त्रसिद्धा चेति नास्ति सन्देहः। तस्या एव स्मृतेः कुतः प्रामाण्यमिति चेद् वेदार्थोपनिबद्धत्वादिति ब्रूमः। उक्तं हि [v]बृहस्पतिना–

**वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतम्।**

**मन्वर्थविपरीता या सा स्मृतिः न प्रशस्यते।। इति।।**

अतो वेदार्थस्मरणपूर्वकं रचितत्वात् मन्वादीनां स्मृतित्वं न तु तद् विरुद्धानामिति। एतादृशी या स्मृतिः, तस्याः प्रामाण्यं विचार्यते। यद्यपि धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थः स्मृतावेव विवेचितास्तथापि तेषु पुरुषार्थेषु धर्मस्यैव प्राधान्यादितरेषाञ्च धर्ममूलत्वात् धर्मप्रतिपादकस्य शास्त्रस्य स्मृतिरित संज्ञा प्रकट्यते। अतो धर्मविषय एव स्मृतेः प्रामाण्यं वेदितव्यम्। ननु धर्म जिज्ञासमानानां प्रमाणं श्रुतिरिति [vi]मनुवचनात् वेदो धर्ममूलमिति [vii]गौतमवचनाच्चश्रुतिरेव केवलं धर्मे प्रमाणमिति चेन्न, वेदेन सह तदनुगतत्वेन स्मृत्याचारादीनामपि धर्मे प्रामाण्यात्। अत एवोक्तं [viii]याज्ञवल्क्येन–

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**

**सम्यक् सङ्कल्पजः कामः धर्ममूलमिदं स्मृतम्।। इति।।**

अनेन तेषां चतुर्णां धर्मे प्रामाण्ये प्रतिपादितेऽपि साक्षादेव परमं प्रमाणं श्रुतिः तदनुमापकत्वेन च परम्परया स्मृतेः प्रामाण्यमवगन्तव्यम्। ततश्चाचारादीनामिति क्रमशः श्रुत्यादीनामुत्तरोत्तरं दौर्बल्यं बोद्धव्यम्। श्रुतिवचनयोः स्मृतिवचनयोर्वा परस्परं विरोधे हि उभयोरस्तुल्यबलत्वात् तुल्यबलविरोधे च विकल्प इति [ix]गौतमवचनाच्चोभयोरन्यतरस्य प्रामाण्यं द्रष्टव्यम्। प्रसङ्गेऽस्मिन् यथोक्तं [x]मनुना–

**उदितेऽनुदिते चैव समयाध्युषिते तथा।**

**सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः।। इति।।**

अनेनाग्निहोत्रहोमार्थमुपदिष्टानामुदितानुदितसमयाध्युषितानां त्रयाणामेव कालानां श्रुत्यक्तत्वात् तेष्वन्यतरस्मिन् हवनं शास्त्रसिद्धमेव भवति। तथैव गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनयनमिति [xi]याज्ञवल्क्यवचनादुपनयनकालस्य वैकल्पिकत्वेन विधानं शास्त्रसम्मतं भवति। एवमेवाचारयोर्विकल्पे द्रष्टव्यम्। एतदनन्तरं धर्मविषये स्मृतिश्रुत्योः परस्परं विरोधे स्मृत्याचारयोर्विरोधे वा तयोः परस्परमतुल्यबलत्वात् श्रुत्यादीनाञ्च क्रमशः पारदौर्बल्याच्च श्रुत्या स्मृतिस्मृतिर्बाध्यते। तस्मिन् विषये माधवाचार्येण [xii]जैमिनीयन्यायमाला विस्तरे विरोधाधिकरणन्याय उदाहृतः। तस्य च न्यायस्य संग्राहकौ श्लोकविमौ यथा–

**उदुम्बरी वेष्टितव्या सर्वेत्येषा स्मृतिर्मिति।**

**अमितिर्वेति सन्देहे मितिः स्यादष्टकादिवत्।।**

**औदुम्बरीं स्पृशन् गायेदिति प्रत्यक्षवेदतः।**

**विरोधान्मूलवेदस्याननुमानादमानता।। इति।।**

अत्रायमभिप्रायो यत् चयनयागे महावेद्यां सदोनामकस्य मण्डपरस्योपरि काचिदुदुम्बरशाखा स्तम्भत्वेन निखाता भवति। ताञ्च शाखामुद्दिश्य स्मृत्या वस्त्रेण सर्ववेष्टनं विधीयते। एषा स्मृतिः प्रमाणं न वेति संशये पूर्वाधिकरणे अष्टका कर्त्तव्या इति स्मृतेर्वेदानुमापकत्वेन यथा प्रामाण्यं तद्वत् सर्ववेष्टनस्मृतिः प्रमाणस्त्विवति पूर्वपक्षिणा उक्ते औदुम्बरीं स्पृष्ट्वा उद्गायेदिति प्रत्यक्षवेदे स्पर्शविधानात् सर्ववेष्टने च स्पष्टुमशक्यत्वात् प्रत्यक्षवेदविरुद्धा स्मृतिर्नैव प्रमाणमिति सिद्धान्तितम्। अनेन श्रुतिस्मृत्योर्मध्ये श्रुतेः स्मृत्यपेक्षया प्राबल्यं वेदितव्यम्। उक्तं यथा– [xiii]बौधायनेन शिष्टाचारप्रमाणप्रसङ्गे पञ्चधा विप्रतिपत्तिः। दक्षिणतस्तथोत्तरत इति। ततश्च दक्षिणदेशीयाचारं निर्दिशन् यथैतदनुपेतेन सह भोजनं, स्त्रिया सह भोजनं, पर्य्युषितभोजनं,

मातुल–मातृ–पितृष्वसृ–दुहितृगमनमिति। अनेन मातुलादिकन्यापरिणयनस्याचारत्वेन विहितेऽपि स्मृत्या सह तस्य विरोधात् देशान्तरे तादृश आचारो बाध्यते, यथोक्तं [xiv]मनुना–

**पैतृष्वसेयीं भगिनीं स्वस्रियां मातुरेव च।**

**मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत्।। इति।।**

अनेन मातुलकन्यापरिणयने चान्द्रायणस्मरणात् तस्य पापत्वेन निषेध: कृत:। अत आचारत्वेन दाक्षिणात्यैर्मातुलकन्यापरिणयनं क्रियतां नाम, न तु देशान्तरीयै:, स्मृतिविरोधादिति। अनेन स्मृते: प्रामाण्यं बोद्धव्यम्। एवं स्मृतिशास्त्रेषु मन्वादिषु स्मृते: प्रामाण्यं तु विद्यते एव। श्रुत्यादावपि स्मृतिप्रमाणं भूयस्त्वेनोपलभ्यते। तत्र प्रथमं तावत् [xv]तैतिरीयश्रुतौ मनुर्वै यत् किञ्चिदवदत् तद् भेषजं भेषजतायै इत्यादिना मनुस्मृते: प्रामाण्यं प्रदर्शितम्। [xvi]तैत्तिरीयारण्यकेऽपि–

**स्मृति: प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्।**

**एतैरादित्यमण्डलं सर्वैरेव विधास्यते।। इति।।**

एवं स्मृतिपदमनुमेयश्रुतिमूलं मन्वादिशास्त्रं बोधयति। अनेनादित्यमण्डलस्य प्रमापनार्थं स्मृते: प्रामाण्यं स्वीकृतम्। पूर्वमीमांसायां अथातो धर्मजिज्ञासा इत्यादिना ग्रन्थारम्भं कुर्वन् [xvii]जैमिनि: श्रुतिस्मृत्यादीनां सर्वेषां धर्मे प्रामाण्यं प्रादर्शयत्। माधवाचार्योऽपि [xviii]जैमिनीयन्यायमाला–विस्तरेऽष्टकाकर्त्तव्येत्यादिस्मृते: श्रुतिमूलकत्वात्प्रामाण्यं प्रत्यपादयत्। तद्यथा–

**अष्टकादिस्मृतेर्धर्मे न मात्वं मानताथवा।**

**निर्मूलत्वान्न मानं सा वेदार्थोक्तौ निरर्थता।।**

**वैदिकै: स्मर्यमाणत्वात् सम्भाव्या वेदमूलता।**

**विप्रकीर्णार्थसंक्षेपात् सार्थत्वादसि मानता।। इति।।**

अत्राष्टकाशब्देन हेमन्तशिशिरयो: कृष्णपक्षाष्टमीषु क्रियमाणानि पितृश्राद्धानि बोध्यन्ते। अत: अष्टका कर्त्तव्येति स्मृतिवाक्यं धर्मे प्रमाणं न वेति शङ्कायां सामान्यपौरुषेयवाक्यत्वेन मूलप्रमाणरहितत्वाद्वेदेनैव तस्यार्थस्यावबोधाच्च स्मृतिवचनं निरर्थकमुवाद्यञ्चेति पूर्वपक्षेणोक्ते उच्यते यत्– वैदिकैर्मन्वादिभि: स्मर्यमाणत्वान्मन्वादिस्मृतीनां वेदमूलकत्वमेव। अपि चोपनयनाध्ययनादिवत् विभिन्नानामनुष्ठानानां नानावेदेषु विप्रकीर्णत्वेनोपलब्धानां स्मृतावेकत्र च संक्षिप्यमाणत्वात् न निरर्थकत्वं नाप्युनुवाद्यत्वम्। अतस्तासां धर्मे प्रामाण्यमस्तीत्यभिप्राय:।

[xix]वेदान्तोऽपि तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिश्रुते: तपसा किल्बिषं हन्ति इत्यादि स्मृतेश्चेत्यादिना स्मृते: प्रामाण्यं स्वीकरोति।

सांख्यशास्त्रे [xx] तत्त्वकौमुद्यां स्वत: प्रमाणस्य युक्तत्वमभिधाय परत: प्रमाणस्य युक्तत्वमाख्यातुमेव वेदमूलस्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं युक्त भवतीति प्रतिपादयता वाचस्पतिमिश्रेण प्रत्यक्षवेदमूलत्वेन मन्वादिस्मृतीनां प्रामाण्यमङ्गीकृतम्।

[xxi] वैशेषिकसूत्रे मुनि: कणादोऽपि धर्मस्य तटस्थलक्षणं यतोऽभ्युदयनि:श्रेयससिद्धि: स धर्म इति ब्रूवन् धर्मप्रतिपादकशास्त्राणां प्रामाण्यं परम्परया स्वीकरोति।

व्यकरणशास्त्रे भगवता [xxii]पतञ्जलिना मिदचोन्त्यात्पर: इति सूत्रस्य भाष्यं कुर्वता नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकारा: पठन्ति, अपवादैरुत्सर्गा बाध्यन्ताम् इत्यादिना धर्मसूत्राणां प्रामाण्यं स्वीकुर्वता तदभिन्नानां स्मृतीनां प्रामाण्यमङ्गीकृतमेव।

साहित्येऽपि [xxiii] मम्मटाचार्येण काव्यहेतुप्रसङ्गे शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगादिलक्षणग्रन्थानामिति वृतौ यत् चतुर्वर्गपदं प्रयुक्तं तस्माद् धर्मार्थकाममोक्ष्या बोध्यन्ते। तत्र धर्मशास्त्रं पूर्वमीमांसारूप जैमिनिप्रणीतं मनुयाज्ञवल्क्यप्रणीतं स्मृतिशास्त्रञ्चेति टीकायां वदता झलकीकरेण स्मृतिशास्त्रस्य प्रामाण्यं स्वीकृतम्। रघुवंशस्य तृतीयसर्गे कालिदासेन श्रुतेरिवार्थं स्मृतिरन्वगच्छदित्यादिना स्मृतेः प्रामाण्यं स्वीकृतमेव। ज्योतिःशास्त्रे युगमानप्रसङ्गे मनुस्मृत्युक्तयुगमानमाश्रित्य गणनाप्रवृत्तेः स्मृतिशास्त्रस्य प्रामाण्यं तत्राप्यङ्गीकृतम्। पुराणेषु तु बहुषु स्थलेषु व्रतविधानप्रसङ्गे स्मृत्युदाहरणानि प्राचुर्य्येण प्राप्यन्ते। अतस्तत्रापि स्मृतेः प्रामाण्यमभ्युपगतम्। [xxiv]कौटलीयार्थशास्त्रे–

**व्यवस्थितार्यमर्यादः कृतवर्णाश्रमः स्थितः।**

**त्रय्या च रक्षितो लोकः प्रसीदति न सीदति।। इति।।**

एतेन वर्णाश्रमधर्मस्य प्रशंसया स्मृतिप्रामाण्यं विष्णुगुप्तेन स्वीकृतमिति मन्यते। सङ्गीतशास्त्रेऽपि स्मृतेः प्रामाण्यं प्रतिपादितम्। यथोक्तं [xxv]सङ्गीतपारिजाते श्रीमदहोवलपण्डितेन–

**अग्निहोत्रं यथा कार्यं राजकार्यं तथैव हि।**

**वेदोक्तत्वात् स्मृतिप्रोक्तं कर्त्तव्यत्वान्मनीषिभिः।। इति।।**

एवमन्येष्वपि शास्त्रेषु स्मृतेः प्रामाण्यं द्रष्टव्यम्। एतावता श्रुत्यादि नानाशास्त्रप्रमाणप्रमितायाः स्मृतेः प्रामाण्यं वेदितव्यं विद्वद्भिरित्यलम्।

**टिप्पणी-**

---

[i]. मनुस्मृतिः – 2/10

[ii]. याज्ञवल्क्यस्मृतिः – 1/3

[iii]. मनुस्मृतिः – 3/16

[iv]. गौतमधर्मसूत्रम् – 3/3/6

[v]. मनुस्मृतिः, भूमिकाभाग, पृष्ठा–6

[vi]. मनुस्मृतिः – 2/13

[vii]. गौतमधर्मसूत्रम् – 1/1/1

[viii]. याज्ञवल्क्यस्मृतिः – 1/7

[ix]. गौतमधर्मसूत्रम् – 1/1/5

[x]. मनुस्मृतिः – 2/15

[xi]. याज्ञवल्क्यस्मृतिः – 1/12

[xii]. जैमिनीयन्यायमालाविस्तरः – 1/3/2

[xiii]. बौधायनधर्मसूत्रम् – 1/2/1

[xiv]. मनुस्मृतिः – 11/171

[xv]. तैत्तिरीयश्रुतिः –2/2/10/2

xvi. तैत्तिरीयारण्यकम्- 10/201/2
xvii. पूर्वमीमांसा - 1/1/1
xviii. जैमिनीन्यायमालविस्तर: - 1/3/1
xix. वेदान्तसार:, पृष्ठा- 54
xx. सांख्यतत्त्वकौमुदी, पृष्ठा- 111
xxi. वैशेषिकसूत्रम् - 1/1/2
xxii. वैयाकरणभूषणसार: - 1/1/47
xxiii. काव्यप्रकाश: - उ-1
xxiv. कौटलीयार्थशास्त्रम् - 1/3
xxv. सङ्गीतपारिजात: - 1/4

**सन्दर्भग्रन्थसूची-**


कौटलीयार्थशास्त्रम् -ओडिशासाहित्य एकाडेमी, भुवनेश्वर:, ओडिशा, 1984

गौतमधर्मसूत्रम् - हरदत्तकृत: मिताक्षरासहिता, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली।

जैमिनीयन्यायमालाविस्तर: - चौखम्बासंस्कृतप्रकाशन, वाराणसी, 1951

तैत्तिरीय आरण्यकम् - आनन्द्राश्रममुद्रणालय, पूना, 1911

पूर्वमीमांसासूत्रम् -चौखम्बा संस्कृत सिरीज अफिस, वाराणसी, 1916

बौधायनधर्मसूत्रम् -चौखम्बा संस्कृत सिरीज अफिस, वाराणसी, 1972

मनुस्मृति: -मन्वर्थमुक्तावलीसहिता, मोतिलाल वनारसीदास, दिल्ली, 1990

याज्ञवल्क्यस्मृति: - डा.गङ्गासागरराय सम्पादित, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली।

वेदान्तसार: -मोतिलाल वनारसीदास, दिल्ली, 199 3

वैयाकरणभूषणसार: -चौखम्भा पब्लिशर्स, वाराणसी, 2000

वैशेषिकसूत्रम् -चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2015

सांख्यतत्त्वकौमुदी -चौखम्बा कृष्णदास अकादमी, वाराणसी, 2013